॥कामराजस्तोत्रप्रारंभः॥ पत्रा ३ समग्र

1

१ ॥श्रीगणेशाय नमः॥ ॥छ॥ ॥अथ कामराजस्तोत्रं लिख्यते॥ ॥छ॥ ॥कल्याणहृदि मिहिरीवामृतपरितापिर्लक्ष्मीलयं व
रणमंगलदीपिकाभिः॥ ॥सेवाभिरंब तव पादसरोजमूले नाकारि किं मनसि भाग्यवतां जनानाम्॥ ॥१॥ ॥एतावदे
व जननि स्पृहणीयमास्ते त्वद्वंदनेषु सलिलस्थगितेऽपि नेत्रे॥ ॥सान्निध्यमुद्यदरुणायुतसोदरस्य त्वद्विग्रहस्य परया सुध
याप्लुतस्य॥ ॥२॥ ॥ईशत्वनामकलुषाः कति नाम संति ब्रह्मादयः प्रतियुगं प्रलयाभिभूताः॥ ॥एकः स एव जननि
स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत्प्रणतिं करोति॥ ॥३॥ ॥लब्ध्वा सकृत्त्रिपुरसुंदरि तावकीनं कारुण्यकंद
लितकांतिभरं कटाक्षं॥ ॥कंदर्पभाव[illegible]सुभगास्त्वयि भक्तिभाजः संमोहयंति तरुणीर्भुवनत्रयेऽपि॥ ॥४॥
॥ ॥ह्रींकारमेव तव नाम गृणंति वेदा मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे॥ ॥यत्संस्मृतौ यमभटादिभयं विहा १

यदीयं तिनंदनवने सहल्गोवृपालैः॥ ॥६॥ ॥हंहुः परानधिगतं परिघूर्णमानः कूरः कथंनुभवितागरलस्यवेगः॥ ॥नाथा
2 सनाय तव मातरिदंतनाहं देहस्यशाश्वदसतालवसीकरस्य॥ ॥६॥ ॥सर्वज्ञतां सदसि वाग्मिपटुतां प्रसूते देवि त्वदंघ्रि
सरसीरुहयोः प्रणामः॥ ॥किंचित्स्फुरन्मुकुटमुज्वलमातपत्रं द्वे चामरे च महतीं वसुधां ददासि॥ ॥७॥ कल्पद्रुमै
त्रि ४ रभिमतप्रतिपादनेषु कारुण्यवारिधिभिरंब भवत्कटाक्षैः॥ ॥आलोकय त्रिपुरसुंदरि मामनाथं त्वय्येव भक्ति
भरितं त्वधिदत्तचित्तं॥ ॥८॥ ॥हंतेतरेष्वपि मनांसि निधाय चान्ये भक्तिं वहंति किल पामरदैवतेषु॥ ॥त्वामे
व देवि मनसाहमनुस्मरामि त्वामेव नौमि शरणं जननि त्वमेव॥ ॥९॥ ॥लक्ष्मेषु सत्स्वपि तवाक्षिविलोकितानां
मालोकय त्रिपुरसुंदरि मां कथंचित्॥ ॥नूनं मयापि सदृशः करुणैकपात्रं जातो जनिष्यति जनो न च जायते वा

२

॥ ॥१०॥ ॥ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराधिवासे ॥ ॥मालाकिरीटमदवारणमाननीया
तान्सेवते मधुमती स्वयमेव लक्ष्मीः ॥ ॥११॥ ॥संपत्कराणि सकलेंद्रियनंदनानि साम्राज्यदाननिरतानि सरोरु-
हाक्षि ॥ ॥त्वद्वंदनानि दुरितौघनिवारणानि मामेव मातरनिशं कलयंतु नान्यं ॥ ॥१२॥ ॥कल्पोपसंहृतिषु कल्पि-
तताण्डवस्य देवस्य खंडपरशोः परभैरवस्य ॥ ॥पाशांकुशैक्षवशरासनपुष्पबाणा सा साक्षिणी विजयते तव मू-
र्तिरेषा ॥ ॥१३॥ ॥लग्नं सदाम भवतु मातरिदं तदीयं तेजःपरं बहुलकुंकुमपंकशोणं ॥ ॥भास्वत्किरीटममृतांशुकृ-
लावतंसमध्ये त्रिकोणनिलयं परमामृतार्द्रं ॥ ॥१४॥ ॥ह्रींकारत्रयसंपुटेन महता मंत्रेण संदीपितं स्तोत्रं
यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित् ॥ ॥तस्य क्षोणिभुजो भवंति वशगा लक्ष्मीश्चिरं स्थायिनी वाणी

२

२

निर्मलसूक्तिभारभरिता जागर्त्ति दीर्घं हृदि ॥ ॥ छ ॥ ॥ २५ ॥ ॥ छ ॥ ॥ इति श्यामराजस्तोत्रं समाप्तिमगमत् ॥ ॥ छ ॥

3

म
३

4